श्रीदक्षिणामूर्ति अष्टोत्तर शतनामस्तोत्र

{॥ श्रीदक्षिणामूर्ति अष्टोत्तर शतनामस्तोत्र ॥}

॥ अथ ध्यानम्॥

वटवृक्ष तटासीनं योगी ध्येयांघ्रि पङ्कजम्।

शरश्चन्द्र निभं पूज्यं जटामुकुट मण्डितम् ॥ १॥

गङ्गाधरं ललाटाक्षं व्याघ्र चर्माम्बरावृतम्।

नागभूषं परंब्रह्म द्विजराजवतंसकम् ॥ २॥

अक्षमाला ज्ञानमुद्रा वीणा पुस्तक शोभितम्।

शुकादि वृद्ध शिष्याढ्यं वेद वेदान्तगोचरम्॥ ३॥

युवानां मन्मथारातिं दक्षिणामूर्तिमाश्रये।

॥ अथ दक्षिणामूर्ति अष्टोत्तर शतनाम स्तोत्रं ॥

ॐ विद्यारूपी महायोगी शुद्ध ज्ञानी पिनाकधृत् ।

रत्नालंकृत सर्वाङ्गी रत्नमौळिर्जटाधरः ॥ १॥

गङ्गाधर्यचलावासी महाज्ञानी समाधिकृत्।

अप्रमेयो योगनिधिर्तारको भक्तवत्सलः॥ २॥

ब्रह्मरूपी जगद्व्यापी विष्णुमूर्तिः पुरातनः ।

उक्षवाहश्चर्मवासाः पीताम्बर विभूषणः॥ ३॥

मोक्षदायी मोक्ष निधिश्चान्धकारी जगत्पतिः।

विद्याधारी शुक्ल तनुः विद्यादायी गणाधिपः॥ ४॥

प्रौढापस्मृति संहर्ता शशिमौळिर्महास्वनः ।

साम प्रियोऽव्ययः साधुः सर्व वेदैरलङ्कृतः ॥ ५॥

हस्ते वह्निधरः श्रीमान् मृगधारी वशङ्करः ।

यज्ञनाथ क्रतुध्वंसी यज्ञभोक्ता यमान्तकः॥ ६॥

भक्तानुग्रह मूर्तिश्च भक्तसेव्यो वृषध्वजः ।

भस्मोध्दूलित सर्वाङ्गः चाक्षमालाधरोमहान् ॥ ७॥

त्रयीमूर्तिः परंब्रह्म नागराजैरलङ्कृतः ।

शान्तरूपो महाज्ञानी सर्व लोक विभूषणः ॥ ८॥

अर्धनारीश्वरो देवोमुनिस्सेव्यस्सुरोत्तमः ।

व्याख्यानदेवो भगवान् रवि चन्द्राग्नि लोचनः ॥ ९॥

जगद्गुरुर्महादेवो महानन्द परायणः ।

जटाधारी महायोगी ज्ञानमालैरलङ्कृतः ॥ १०॥

व्योमगङ्गा जल स्थानः विशुद्धो यतिरूर्जितः ।

तत्त्वमूर्तिर्महायोगी महासारस्वतप्रदः ॥ ११।

व्योममूर्तिश्च भक्तानां इष्टकाम फलप्रदः ।

परमूर्तिः चित्स्वरूपी तेजोमूर्तिरनामयः ॥ १२॥

वेदवेदाङ्ग तत्त्वज्ञः चतुःषष्टि कलानिधिः ।

भवरोग भयध्वंसी भक्तानामभयप्रदः ॥ १३॥

नीलग्रीवो ललाटाक्षो गज चर्मागतिप्रदः ।

अरागी कामदश्चाथ तपस्वी विष्णुवल्लभः ॥ १४॥

ब्रह्मचारी च सन्यासी गृहस्थाश्रम कारणः ।

दान्तः शमवतां श्रेष्ठो सत्यरूपो दयापरः ॥ १५॥

योगपट्टाभिरामश्च वीणाधारी विचेतनः ।

मतिप्रज्ञा सुधाधारी मुद्रापुस्तक धारणः ॥ १६॥

वेतालादि पिशाचौघ राक्षसौघ विनाशनः ।

राज यक्ष्मादि रोगाणां विनिहन्ता सुरेश्वरः ॥

॥ इति श्री दक्षिणामूर्ति अष्टोत्तर शतनाम स्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by Arun Shantharam shantharam.arun at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Dakshinamurthy Ashtottara Shatanama Stotram Lyrics in Devanagari PDF
% File name : dakshina108str.itx
% Category : aShTottarashatanAma
% Location : doc_shiva
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Arun Shantharam shantharam.arun at gmail.com
% Proofread by : Arun Shantharam shantharam.arun at gmail.com
% Latest update : April 6, 2009
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 12, 2015] at Stotram Website